**শ্রী নীলসরস্বতী মাতার ধ্যান**

প্রত্যালীঢ় পদাং দেবীং মহামায়াং ত্রিলোচনাং
সর্ব্বলঙ্কারভূষাঢ্যং মহানীল প্রভাং পরাম্ !!
খড়গং পাশং দক্ষিনে চ বামেনন্দীবরমুরদ্ধতঃ
দধতঞ্চ সকং দেব্যা ভাবয়েৎ সাধ্যকোত্তমঃ !!

শ্রী নীল স্বরস্বতী স্তোত্রম্
-----------------------------------
মাতর্নীলসরস্বতি প্রণমতাং সৌভাগ্যসম্পদপ্রদে
প্রত্যালীঢপদস্থিতে শবহৃদি স্মেরাননাম্ভোরুহে।
ফুল্লেন্দীবরলোচনে ত্রিনয়নে কর্ত্রীকপালোৎপলে
খড্গচাদধতী ত্বমেব শরণং ত্বামীশ্বরীমাশ্রয়ে॥ ১
বাচামীশ্বরি ভক্তিকল্পলতিকে সর্বার্থসিদ্ধিশ্বরি
গদ্যপ্রাকৃতপদ্যজাতরচনাসর্বার্থসিদ্ধিপ্রদে।
নীলেন্দীবরলোচনত্রয়যুতে কারুণ্যবারান্নিধে
সৌভাগ্যামৃতবর্ধনেন কৃপয়াসিঞ্চ ত্বমস্মাদৃশম্॥ ২
খর্বে গর্বসমূহপূরিততনো সর্পাদিবষোজ্বলে
ব্যাঘ্রত্বকপরিবীতসুন্দরকটিব্যাধূতঘণ্টাঙ্কিতে।
সদ্যঃকৃত্তগলদ্রজঃপরিমিলন্মুণ্ডদ্বয়ীমূর্দ্ধজগ্রন্থিশ্রেণি
নৃমুণ্ডদামললিতে ভীমে ভয়ং নাশয়॥ ৩
মায়ানঙ্গবিকাররূপললনাবিন্দ্বর্দ্ধচন্দ্রাম্বিকে হূংফট্ কারময়ি
ত্বমেব শরণং মন্ত্রাত্মিকে মাদৃশঃ।
মূর্তিস্তে জননি ত্রিধামঘটিতা স্থূলাতিসূক্ষ্মাপরা
বেদানাং নহি গোচরা কথমপি প্রাজ্ঞৈর্নুতামাশ্রয়ে॥ ৪

ত্বৎপাদাম্বুজসেবয়া সুকৃতিনো গচ্ছন্তি সাযুজ্যতাং
তস্যাঃ শ্রীপরমেশ্বরত্রিনয়নব্রহ্মাদিসাম্যাত্মনঃ।

সংসারাম্বুধিমজ্জনে পটুতনুর্দেবেন্দ্রমুখ্যাসুরান্ মাতস্তে
পদসেবনে হি বিমুখান্ কিং মন্দধীঃ সেবতে॥ ৫
মাতস্ত্বৎপদপঙ্কজদ্বয়রজোমুদ্রাঙ্ককোটীরিণস্তে দেবা
জয়সঙ্গরে বিজয়িনো নিঃশঙ্কমঙ্কে গতাঃ।
দেবোঽহং ভুবনে ন মে সম ইতি স্পর্দ্ধাং বহন্তঃ পরে
তত্তুল্যাং নিয়তং যথা শশিরবী নাশং ব্রজন্তি স্বয়ম্ ৬
ত্বন্নামস্মরণাৎপলায়নপরান্দ্রষ্টুং চ শক্তা ন তে
ভূতপ্রেতপিশাচরাক্ষসগণা যক্ষশ্চ নাগাধিপাঃ।
দৈত্যা দানবপুঙ্গবাশ্চ খচরা ব্যাঘ্রাদিকা জন্তবো
ডাকিন্যঃ কুপিতান্তকশ্চ মনুজান্ মাতঃ ক্ষণং ভূতলে॥ ৭
লক্ষ্মীঃ সিদ্ধিগণশ্চ পাদুকমুখাঃ সিদ্ধাস্তথা বৈরিণাং

স্তম্ভশ্চাপি বরাঙ্গনে গজঘটাস্তম্ভস্তথা মোহনম্।
মাতস্ত্বৎপদসেবয়া খলু নৃণাং সিদ্ধ্যন্তি তে তে গুণাঃ
ক্লান্তঃ কান্তমনোভবোঽত্র ভবতি ক্ষুদ্রোঽপি বাচস্পতিঃ॥ ৮
তারাষ্টকমিদং পুণ্যং ভক্তিমান যঃ পঠেন্নরঃ।
প্রাতর্মধ্যাহ্নকালে চ সায়াহ্নে নিয়তঃ শুচিঃ॥ ৯
লভতে কবিতাং বিদ্যাং সর্বশাস্ত্রার্থবিদ্ভবেৎ
লক্ষ্মীমনশ্বরাং প্রাপ্য ভুক্ত্বা ভোগান্যথেপ্সিতান্।
কীর্তিং কান্তিং চ নৈরুজ্যং প্রাপ্যান্তে মোক্ষমাপ্নুয়াৎ ॥ ১০॥

....... শ্রীনীলতন্ত্রে তারাস্তোত্রং সম্পূর্ণম্।

Published on: Jan, 14 2023 11:51